# संस्कृत-वार्ता:

दिनाङ्कः-09.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमंत्री नरेंद्रमोदी तस्य समकक्षीयः ब्रिटेनस्य प्रधानमन्त्री कीर-स्टारमर इत्यसौ च अद्य प्रौद्योगिकी, रक्षा, कृत्रिम-बुद्धिमत्ता, सतत-विकास, नवीकरणीयोर्जा चेत्यादिभिः विषयैः सह अन्यविशिष्ट-विषयेषु विशद-चर्चाम् अकरुताम् ।
- भारत- ऑस्ट्रेलियादेशौ द्वयोः देशयोः मध्ये सेनयोः सुदृढीकरणम् उद्दिश्य महत्वपूर्ण-रक्षा-सन्धिषु हस्ताक्षरं कृतवन्तौ ।
- निर्वाचनायोगेन राजनीतिकदलानि बिहार-विधानसभायाः आगामिषु निर्वाचनेषु विधानसभायाः उपनिर्वाचनेषु च प्रचारावधौ प्रतिद्वंद्वि-दलानि प्रत्याशिनः च विरुध्य *आर्टिफिशियल-इंटेलिजेंस* इति कृत्रिम-बुद्धिमत्तायाः उपयोगं न कर्तुं निर्दिष्टानि ।
- हङ्गेरियन्-उपन्यासकारः पटकथा-लेखकः च लास्ज़लो-क्रास्ज़नाहोरकाई इत्येषः पञ्चविंशत्युत्तर-द्विसहस्रतमवर्षस्य साहित्यस्य नोबेल-पुरस्कारं प्राप्तवान् ।
- महिलानां एकदिवसीय-क्रिकेट-विश्व-चषके , विशाखापत्तनम् इत्यत्र भारत-दक्षिणाफ्रीका-दलयोर्मध्ये क्रीडास्पर्धा प्रचलति ।

---

प्रधानमन्त्री-ब्रिटेनः

प्रधानमंत्री नरेंद्रमोदी तस्य समकक्षीयः ब्रिटेनस्य प्रधानमन्त्री कीर-स्टारमर इत्यसौ च अद्य प्रौद्योगिकी, रक्षा, कृत्रिम-बुद्धिमत्ता, सतत-विकास, नवीकरणीयोर्जा चेत्यादिभिः विषयैः सह अन्यविशिष्ट-विषयेषु विशद-चर्चाम् अकरुताम् द्वयोः मध्ये मुम्बय्यां प्रतिनिधिमंडलस्तरीया वार्ता अभवत् ।अद्य अपराह्ने मुम्बय्यां ब्रिटेनस्य प्रधानमंत्रिणा कीर-स्टारमरः इत्यनेन सह एकं संयुक्त-वार्ताहर-सम्मेलनम् सम्बोधयन् श्री मोदी प्रोक्तवान् यत् द्वावेव देशौ वैश्विकस्थिरतायै आर्थिकप्रगत्यै च प्रतिबद्धौ स्तः । भारत-ब्रिटेनयोः

मध्ये व्यापकार्थिकं व्यापारिकं च साहमत्यं प्रकाशयन् श्रीमोदी प्रोक्तवान् यत् अनेन युवानः आजीविकायाः नवीनावसरान् लप्स्यन्ते द्वयोः देशयोर्मध्ये च व्यापारस्य विस्तारो भविष्यति।

ब्रिटेनस्य प्रधानमंत्री कीर-स्टारमरः अकथयत् यत् भारत-ब्रिटेनदेशौ भविष्याधारितस्य एकस्य आधुनिक-सहकार्यस्य निर्माणं कुर्वन्तौ स्तः । भारत-ब्रिटेन-व्यापकार्थिक-व्यापारिक-सन्धिः ऐतिहासिकी अस्ति इति सम्बोधयन् , श्री-स्टारमरः अकथयत् यत् टैरिफ-शुल्केषु अपचित्या परस्पर-व्यापारिकापणेषु सक्रियभूमिकावर्धनेन च विकासोन्मुखा गतिः भविष्यति आजीविकायाः नवीनावसराः च उत्पत्स्यन्ते । अनन्तरं , प्रधानमंत्री नरेंद्रमोदी स्वकीयेन ब्रिटिश-समकक्षेन कीर-स्टारमरः इत्यनेन सह सीईओ-फोरम इत्येतत् संबोधितम् अकरोत् । अस्मिन् अवसरे श्री-मोदी प्रोक्तवान् यत् एतत् वर्षम् अभूतपूर्वम् अस्ति यदा वैश्विकानिश्चितताया: मध्ये भारत-ब्रिटेनदेशयोः सम्बन्धाः स्थिराः सुदृढाः चाभवन्।

------------------------------------------------

राजनाथ-ऑस्ट्रेलियायात्रा

रक्षामन्त्रिणः राजनाथसिंहस्य ऑस्ट्रेलिया-यात्रावधौ भारत- ऑस्ट्रेलियादेशौ महत्वपूर्ण-रक्षा-सन्धिषु हस्ताक्षरं कृतवन्तौ । राजनाथसिंहेन ऑस्ट्रेलियायाः उपप्रधानमन्त्रिणः एवं रक्षामन्त्रिणः रिचर्ड-मार्लेस इत्यस्य उपस्थितौ एतेषु रक्षासन्धिषु हस्ताक्षरं कृतम् । राजनाथसिंहेन कैनबरायां स्वसमकक्षेण रिचर्ड-मार्लेस इत्यमुना सह वार्ता कृता । अत्रावसरे रक्षामन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् वार्ता-आतङ्कवादौ युगपत् नैव भवितुमर्हतः । उभौ नेतारौ रक्षोद्योग-साइबरसुरक्षा-समुद्रीसुरक्षा- क्षेत्रीय-समाह्वानैः भारत-ऑस्ट्रेलियादेशयोः रक्षासहयोगस्य पूर्णविस्तारस्य समीक्षां अकुरुताम् । ऑस्ट्रेलियादेशस्य रक्षामन्त्रिणा प्रोक्तं यत् भारतेन सह नव-हस्ताक्षरित-रक्षासन्धयः उभयोः देशयोः मध्ये सशस्त्रबलेषु सहभागितां दृढीकरिष्यन्ति । ऑस्ट्रेलिया-भारतयोः रक्षामन्त्रिणोः संयुक्तवक्तव्यानुसारं एतस्मिन् उपवेशने द्विपक्षीय- रक्षाविस्तारस्य सहैव परामर्श-सहयोगयोः संवर्द्धनार्थं उभाभ्यामपि प्रतिबद्धता प्रकटिता।

------------------------------------------------

प्रधानमंत्री अमेरिका-शांति-योजना:

प्रधानमंत्रिणा नरेंद्र-मोदिना अमेरिकायाः राष्ट्रपतिना डोनाल्ड-ट्रंपः इत्यनेन प्रस्तावितायाः शांति-योजनायाः प्रथमचरणस्य अन्तर्गतं इजरैल-हमासयोः मध्ये हस्ताक्षरितस्य सहमतिपत्रस्य स्वागतं कृतमस्ति । एकस्मिन् सामाजिकसंदेशे श्रीमोदी आशां प्रकटितवान् बंधकानां विमोचनेन गाजाक्षेत्रस्य जनेभ्यः मानवीय-सहायतायां वृद्धिना च ते लाभान्विताः भविष्यन्ति अनेन स्थायि-शांत्याः मार्गम् अपि प्रशस्तं भविष्यति । सः प्रोक्तवान् यत् एतत् साहमत्यम् इज्रैलदेशस्य प्रधानमन्त्रिणः बेंजामिन-नेतन्याहू इत्यस्य सुदृढ-नेतृत्वस्य अपि प्रतीकम् अस्ति । इतः पूर्वं , अमेरिकायाः राष्ट्रपतिः डोनाल्ड-ट्रंपः घोषणाम् अकरोत् यत् इज्रैल-हमासौ गाजाक्षेत्रे युद्धविरामं कर्तुं बंधकान् विमोचयितुं च अमेरिकायाः शान्तियोजनायाः प्रथमचरणे सहमतौ अभवताम् येन वर्षद्वयपूर्वस्य युद्धं समाप्तम् अभवत् । अवधेयं यत् ट्रंपवर्यस्य इयं घोषणा मिस्रदेशस्य शर्म-अल-शेख इत्यत्र एकस्य दिवस्य विशदवार्तायाः अनन्तरं अभवत् ।

------------------------------------------------

**प्रधानमंत्री-यूके-फिनटेक:**

प्रधानमंत्री नरेंद्रमोदी प्रोक्तवान् यत् देशस्य डिजिटल-पारिस्थितिकी-तंत्र नवाचाराय समावेशनाय च वैश्विकं मानकं संस्थापयति ।अद्य सायं मुम्बय्यां **ग्लोबल-फिनटेक-फेस्ट** इत्यस्य कार्यक्रमं संबोधयन् श्रीमोदी प्रोक्तवान् यत् प्रौद्योगिक्याः लोकतंत्रीकरणेन भारतं विशिष्टेषु समावेशिराष्ट्रेषु एकम् प्रोद्योगिकीसम्पन्नं राष्ट्रम् अस्ति । सः प्रोक्तवान् यत् देशे प्रतिमासं यूपीआई इत्यस्य माध्यमेन पञ्चविंशति-लक्ष-कोटिरूप्यकाणां विंशत्यर्बुदसंख्याकम् धनादानप्रदानं भवति ।

ग्लोबल-फिनटेक-फेस्ट इत्येत् सम्मेलनं संबोधयन् , यूनाइटेड-किंगडम इत्यस्य प्रधानमंत्री कीर-स्टारमरः इत्यसौ अकथयत् यत् ब्रिटेन-भारतदेशौ स्वाभाविक-सहयोगिनौ, फिनटेक इत्यत्र वैश्विकाग्रिण्यौ च स्तः। सः प्रोक्तवान् यत् भारत-ब्रिटेन-मुक्त-व्यापार-साहमत्यं द्वयोः देशय़ोः सकल-गृहोत्पादं वृद्धिं प्रति नेष्यति ।

------------------------------------------------

## निर्वाचनायोगः-बिहारादर्शाचारसंहिता

निर्वाचनायोगेन राजनीतिकदलानि निर्दिष्टानि सन्ति यत् तानि बिहार-विधानसभायाः आगामिषु निर्वाचनेषु विधानसभायाः उपनिर्वाचनेषु च प्रचारावधौ प्रतिद्वंद्वि-दलानि प्रत्याशिनः च विरुध्य ***आर्टिफिशियल-इंटेलिजेंस*** इति कृत्रिम-बुद्धिमत्तायाः उपयोगं न कुर्युः । इमे दिशानिर्देशाः आदर्शाचार-संहितायाः अन्तर्गतं प्रख्यापिताः सन्ति । आयोगेन सामाजिकसंदेशपटलेषु अन्येषु विविधविज्ञापनेषु च सूचनाः विकृतं कुर्वन्ती भ्रामकसूचनां प्रसारयन्ती च उपकरणानि विरुध्य संचेतना प्रदत्ता अस्ति ।

---

## भारत-संयुक्तराष्ट्रम्

भारतेन संयुक्तराष्ट्रे पाकिस्तानस्य उत्पीडन-दुष्प्रचारयोः वृत्तं प्रकाशितम्। संयुक्त-राष्ट्रमहासभायां भारतस्य राष्ट्रियवक्तव्यं प्रददता भाजपा-सांसदेन पीपी-चौधरी इत्यमुना पाकिस्तानद्वारा संयुक्तराष्ट्रस्य मञ्चानां पुनः पुनः दुरुपयोगः, स्वस्यैव जनतायाः उपरि विस्फोट-वर्षणम् सहैव विरोधप्रदर्शनानां क्रूरतया निग्रहणम् इत्येते विषयाः उत्थापिताः । तेन वैश्विक-समूहाय स्मारितं यत् पाकिस्तानस्य सेनाप्रमुखेणापि सः मलवाहकत्वेन अभिलक्षितः येन तस्य शासनव्यवस्थायाः विकृतिः प्रकटीभवति। सः अवदत् यत् भारतं वैश्विक-दक्षिणस्य संयुक्तराष्ट्रस्य च विश्वसनीय-सहभागित्वं निर्वक्ष्यति ।

---

## जीवंत-गुजरात-क्षेत्रीय-सम्मेलनम्

रेलमंत्री अश्विनी-वैष्णवः वैश्विक-समस्यानां मध्ये एकं विकसितं भारतं निर्मातुं बलं प्रायच्छत् ।अद्य गुजरातस्य मेहसाणाजनपदे प्रथमवारं आयोजिते जीवंत-गुजरात-क्षेत्रीय-सम्मेलनं सम्बोधयन् श्रीवैष्णवः ने गुजरातस्य उल्लेखनीयाम् औद्योगिक-प्रगतिम् प्रकाशितवान् । सः प्रोक्तवान् यत् विगतेषु एकादशवर्षेषु राज्येण सेमीकंडक्टर-इलेक्ट्रॉनिक्स्

इत्यनयोः क्षेत्रयोः बृहद्रूपेण वृद्धिः अधिगता अस्ति सहैव तेन स्वकीये रेलवे-नेटवर्क इत्यस्मिन् अपि व्यापको विस्तारः कृतः अस्ति ।

---

**अमितशाहः-कश्मीरः**

गृहमन्त्री अमितशाहः नवदिल्ल्यां जम्मू-कश्मीरे सुरक्षास्थितिं समीक्षितुं उच्चस्तीयस्य उपवेशनस्य अध्यक्षताम् अकरोत् ।

---

**मध्यप्रदेश-औषधम्**

मध्यप्रदेशस्य विशेषान्वेषण-दलेन तमिलनाडु-आरक्षकदलेन च अद्य प्रातः काञ्चीपुरमक्षेत्रे श्रीशन-फ़ार्मेसी-संस्थायाः स्वामी जी.रङ्गनाथन इत्येषः विषाक्त-कफरोधक-औषध-निर्माणार्थं निगडितः। अस्य औषधस्य सेवनेन तावत् राजस्थान-मध्यप्रदेशयोः बहवः बालकाः मृत्युमुपगताः । मध्यप्रदेशस्य विशेषान्वेषण-दलेन राज्य-आरक्षकैश्च सः चेन्नै-नगरस्य कोडम्बक्कमस्थलात् तस्य आवासात् निगृहीतः। छिन्दवाडा-बैतूल-जनपदयोः एतावता विषयुक्तेन कफरोधक-औषधेन त्रयोविंशति-बालकाः मृताः ।

---

**नोबेलपुरस्कारः-साहित्यम् 2025**

हङ्गेरियन्-उपन्यासकारः पटकथा-लेखकः च लास्ज़लो-क्रास्ज़नाहोरकाई इत्येषः पञ्चविंशत्युत्तर-द्विसहस्रतमवर्षस्य साहित्यस्य नोबेल-पुरस्कारं प्राप्तवान् ।

---

**महिला-क्रिकेटस्पर्धा**

महिलानां एकदिवसीय-क्रिकेट-विश्व-चषके , भारतं विशाखापत्तनम् इत्यत्र दक्षिण-अफ्रीका-दलं विरुध्य अन्तिमसूचनाप्राप्तिं यावत् ...........क्रीडकानां हानौ ............धावनाङ्कैः सह....... कन्दुकप्रक्षेपचक्रस्य क्रीडां क्रीडति । इतः पूर्वं , दक्षिण-

अफ्रीकादलेन पणकं विजित्य क्षेत्ररक्षणस्य विकल्पं चितम् आसीत् , यस्मिन् वृष्टिकारणेन विलम्बो जातः । अवधेयं यत् भारतीयदलेन प्रतिस्पर्धायाः शुभारम्भः श्रीलङ्का-पाकिस्तान-दलयोरुपरि विजयम् अधिगत्य कृता अस्ति ।

।। इति वार्ता ।।